Date
Page

topic - 15:

सप्तमी विभक्ति।

सप्तमी शौण्डैः।

सप्तम्यन्तं शौण्डादिभिः प्राग्वत्। अक्षेषु शौण्डः — अक्षशौण्डः। इत्यादि। द्वितीयातृतीयेत्यादियोगविभागादन्यत्रापि। तृतीयादिविभक्तीनां प्रयोगवशात् समासो ज्ञेयः।

सप्तम्यन्त सुबन्त का 'शौण्ड' (चतुर) आदि के सुबन्त के साथ समास होता है और उस समास को तत्पुरुष कहते हैं। उदाहरण के। लिए अक्षेषु शौण्डः (पासे खेलने में चतुर) इस विग्रह में सप्तम्यन्त सुबन्त 'अक्षेषु' का सुबन्त शौण्डः से समास हो 'अक्षशौण्डः' रूप बनता है। इस प्रकार अक्षेषु कितवः। से अक्षकितवः' और 'अक्षेषु धूर्तः' से अक्षधूर्त आदि अन्य रूप भी बनते हैं।

सिद्धशुष्कपक्वबन्धैश्च। एतैः सप्तम्यन्तं प्राग्वत्। सांकाश्यसिद्धः। आतपशुष्कः स्थालीपक्वः। चक्रबन्धः।

ध्वाङ्क्षेण क्षेपे

ध्वाङ्क्षवाचिना सह सप्तम्यन्तं समस्यते निन्दायाम्। तीर्थे ध्वाङ्क्ष इवतीर्थध्वाङ्क्षः। तीर्थकाकः।

कृत्यैर्ऋणे। सप्तम्यन्तं कृत्यप्रत्ययान्तैः
सह प्राग्वदावश्यके। मासेदेयम् ऋणम्।
ऋणे ग्रहणं नियोगोपलक्षणार्थम्।
पूर्वाह्णे गेयं साम।

संज्ञायाम्।

सप्तम्यन्तं सुपा प्राग्वत् संज्ञायाम्।
वाक्येन संज्ञानवगमान्नित्य समासोऽयम्।
अरण्येतिलकाः। वनेकशेरुकाः।
(हलदन्तात् सप्तम्याः इत्यलुक्)।

क्तेनाहोरात्रावयवाः।

अह्नो रात्रेश्चावयवाः सप्तम्यन्ताः
क्तान्तेन सह प्राग्वत्। पूर्वाह्णकृतम्,
अपररात्रकृतम्। अवयवग्रहणं किम्-
अह्नि दृष्टम्

'तत्र' इत्येतत्सप्तम्यन्तं
क्तेन सह प्राग्वत्। तत्रभुक्तम्।

क्षेपे। सप्तम्यन्तं क्तान्तेन प्राग्व-
न्निन्दायाम्। 'अवतप्तेनकुलस्थितं
त एतत्।